# Shri Mahakalabhairava Sahasranama Stotram

# શ્રીમહાકાલભૈરવસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Shri Mahakala Sahasranama Stotram 3

File name : mahAkAlasahasranAmastotram3.itx

Category : shiva, sahasranAma

Location : doc_shiva

Proofread by : Ruma Dewan

Description-comments : shivAgamakalpa

Latest update : March 1, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2023

*sanskritdocuments.org*

# શ્રીમહાકાલભૈરવસહસ્રનામસ્તોત્રમ્

શ્રી દેવ્યુવાચ -
યદ્ગુહ્યં ભગવન્ વ્યાપ્તં ત્રિષુલોકેષુ દુર્લભમ્ ।
કોટિ ગ્રન્થેષુ ગોપ્યત્વાત્ સૂચિતં ન પ્રકાશિતમ્ ॥ ૧॥

સર્વસમ્પત્પ્રદં દેવ સર્વાપત્ક્ષયકારકમ્ ।
તદહં શ્રોતુમિચ્છામિ ભૈરવસ્ય મહાત્મનઃ ॥ ૨॥

નામ્નાં સહસ્રં દિવ્યાનાં સારતઃ સારયુદ્ધતમ્ ।
કૃપયા યદ ભૂતેશ યદ્યહં પ્રાણવલ્લભાઃ ॥ ૩॥

શ્રી શિવ ઉવાચ -
સૂચિતમેત્વયિ સ્નેહાત્ ન પ્રકાશ્યં કુલેશ્વરી ।
નામ્નાં સહસ્રકોટીનાં મધ્યાત્ સારસમુદ્ધતમ્ ॥ ૪॥

ન વક્તવ્યં મયા દેવિ ચિત્તસ્થં મમ સર્વદા ।
અપકાશ્ય મતો દેવિ પ્રાણેભ્યોઽપિ વરં પ્રિયમ્ ॥ ૫॥

શ્રી દુર્વાસા ઉવાચ -
ઇત્યુક્તો ભગવાન્ પ્રીતો દધ્યૌ સ્વાત્માનમાત્મના ।
પુલકાઙ્કિત સર્વાઙ્ગે ચ કિઞ્ચદુવાવહ ॥ ૬॥

શ્રી પાર્વત્યુવાચ -
દેવ દેવ મહાદેવ ભક્તાનુગ્રહકારક ।
નામ્નાં સહસ્રં દિવ્યાનાં મહાકાલસ્ય મે વદ ॥ ૭॥

ગોપ્યં તુ સર્વાગોયાનાં વદમે પરમેશ્વર ।
અપ્રકાશ્ય કુલેશાન યદ્યહં પ્રાણવલ્લભાઃ ॥ ૮॥

શ્રીમહાકાલભૈરવસહસ્રનામસ્તોત્રં
(અથ "ભૈરવ તન્ત્ર" મેં વર્ણિત શ્રીમહાકાલ ભૈરવ
સહસ્રનામસ્તોત્ર કા વર્ણન કિયા જાતા હૈ । ઇસ સ્તોત્ર કા પાઠ કરને

મેં કિસી વિશેષ પ્રકાર કે પૂજન અથવા ન્યાસ કી આવશ્યકતા નહીં હૈ ।
કેવલ પાઠ માત્ર સે હી યહ સ્તોત્ર અભીપ્સિત ફલ કો દેને વાલા કહા ગયા હૈ ।)

ઈશ્વર ઉવાચ -
દેવેશિ ભક્ત સુલભે દેવનાયક વન્દિતે ।
ભક્તાનાં કાર્યં સિદ્ધસ્ય નિદાનં બ્રૂહીતત્ત્વતઃ ॥ ૧॥

વિનૈવ ન્યાસ જાલેન પૂજનેન વિના ભવેત્ ।
વિના કાયાદિ ક્લેશેન વિત્તવ્યયં મિનેશ્વરિ ॥ ૨॥

દેવ્યુવાચ
ૐ અસ્ય શ્રી મહાકાલભૈરવસહસ્રનામસ્તોત્રમન્ત્રસ્ય
બ્રહ્માનન્દ ભૈરવ ઋષિઃ, ત્રિષ્ટુપ્ છન્દઃ, મહાકાલભૈરવો
દેવતા, બં બીજમ્, હ્રીં શક્તિઃ સર્વાભીષ્ટજા સિદ્ધયે જપે વિનિયોગઃ ।
સહસ્રનામાનિ ।
ૐ હ્રીં મહાકાલઃ કામદોનાથોઽનાથ પ્રિય પ્રભાકારઃ ।
ભૈરવો ભીતિહા દર્પઃ કન્દર્પો મીન કેતનઃ ॥ ૧॥

શ્રી શિવ ઉવાચ -
શ ૃણુદેવિ મહાગુહ્યં રહસ્યં પરમાદ્ભુતમ્ ।
ન કસ્ય ચિન્મયારવ્યાતમદ્યાપિ પ્રાણવલ્લભે ॥ ૯॥

સુખસમ્પતપ્રદે દેવિ ધન ધાન્ય જય પ્રદમ્ ।
ભૂતગ્રહ વિશાનાં સ્મરણાદેવ નાશનમ્ ॥ ૧૦॥

કૃત્યાદ્રોહાદિ શમનં બાલગ્રહ નિવારણમ્ ।
ચતુર્વર્ગ ચતુર્ભદ્ર પ્રદમેતં ન સંશયઃ ॥ ૧૧॥

મહાકાલસ્ય નામાનિ પ્રયુતાન્યર્બુદાનિ ચ ।
સારાત્ સારતરં તેષાં સહસ્રં શ ૃણુ પત્નતઃ ॥ ૧૨॥

સુધાસિન્ધુ મણિ દ્વીપે પારિજાત વનાવૃતે ।
પ્રજ્વલપિતૃ ભૂમધ્યે પ્રોતહૃત્સુપ્તમીશ્વરમ્ ॥ ૧૩॥

વિપરીતરતા શક્તં દક્ષિણા વિલસદ્દ્યુતિમ્ ।
ચતુર્બાહું ત્રિનયનમજ્જનાદ્રિ સમપ્રભમ્ ॥ ૧૪॥

જટાજૂટધરં દેવ શશાઙ્કકૃત શેખરમ્ ।
ભુજઙ્ગમેખલાયુક્તં દિગ્વાસસમનાકુલમ્ ॥ ૧૫॥

ડમરું ચ કપાલં ચ વરં શૂલં  ક્રમાત્  કરૈઃ ।
દધતં વિકટૈન્દન્ત કરાલવદનં વિભુમ્  ॥ ૧૬ ॥

ધ્યાત્વૈવં સાધક શ્રેષ્ઠો જપન્સિદ્ધિં સમશ્નુતે  ॥ ૧૭ ॥

શ્રી દુર્વાસા ઉવાચ -
નામ્નાં સહસ્રં દિવ્યાનાં ભૈરવસ્ય મહાકૃતેઃ ।
વક્ષ્યામિ તત્ત્વતઃ સમ્યક્સર્વોપદ્રવનાશનમ્  ॥ ૧૮ ॥

સર્વપાપહરં પુણ્યં સાધકાનાં સુખપ્રદમ્ ।
આયુઃ પુષ્ટિઃ શ્રીકરં ચ પુત્રપૌત્રવિવર્ધનમ્  ॥ ૧૯ ॥

ભૈરવસ્તોત્રમન્ત્રસ્ય મહાદેવો ઋષિસ્મૃતઃ ।
મહાકાલો ભૈરવશ્ચ દેવતા પરિકીર્તિતાઃ  ॥ ૨૦ ॥

છન્દોઽનુષ્ટુપ્સર્વકાર્ય સિદ્ધ્યર્થં સાધકસ્ય તુ ।
મહાકાલસ્ય તુષ્ટ્યર્થે વિનિયોગઃ પ્રકીર્તિતઃ  ॥ ૨૧ ॥

મહાદેવેન યત્ પ્રોક્તં પાર્વત્યૈ સર્વમઙ્ગલમ્ ।
તચ્છૃણુષ્વોપમન્યો મે કીર્ત્યમાનં સુમઙ્ગલમ્  ॥ ૨૨ ॥

અથ માહાત્મ્યમ્ -
સર્વશત્રુક્ષયકરં સર્વાપદ્વિનિવારણમ્ ।
સર્વવેદાગમાનાં ચ સારાત્સાર સમુદ્ધૃતમ્  ॥ ૨૩ ॥

દેવદેવેન યત્પ્રોક્તં હિમાચલસુતાં પ્રતિ ।
અત્યાગ્રહાતિ હીનાઙ્ગીં કરુણ્યાત્પ્રીત ચેતસા  ॥ ૨૪ ॥

તદેવતે પ્રવક્ષ્યામિ ગુરુભક્તાય સામ્પ્રતમ્ ।
અતિયત્નાન્ મયાપ્રાપ્તં દક્ષિણા ક્રમયોગતઃ  ॥ ૨૫ ॥

તત્તેઽહં સમ્પ્રવક્ષ્યામિ યચ્છ્રુતં પરમાદ્ભૂતમ્ ।
કુલીનાય ચ શાન્તાય ભક્તાય ભજુબુદ્ધયે  ॥ ૨૬ ॥

ધનપ્રાણ પ્રદાત્રે ચ દેવાર્ચાતિરતાય ચ ।
દેવતાભાવ યુક્તાય ધર્મશ્રદ્ધાપરાય ચ  ॥ ૨૭ ॥

વદાન્યાયાતિયોગ્યાય પ્રવીણાય દયાલવે ।
ગોશ્વેપ્રદેયમાજ્ઞામમિતિ દેવ્યાપુરામમ  ॥ ૨૮ ॥

અતસ્તુભ્યં પ્રવક્ષ્યામિ કરુણાબ્ધેર્મહાત્મનઃ ।
મહાકાલસ્ય દેવસ્ય મદોન્મત્તસ્ય શૂલિનઃ ॥ ૨૯॥

સ્તોત્રં સહસ્રનામાખ્યં સહસ્રગુણ સમ્પતમ્ ।
તસ્યસ્મરણમાત્રેણ શ્રવણેન પ્રયત્નત ॥ ૩૦॥

પઠનાત્પાઠનાદ્વાઽપિ સર્વશ્રેયસ્કરં પરમ્ ।
યત્ર સ્થિતમિદં સ્તોત્રં તત્ર શ્રીઃ સર્વતોમુખી ॥ ૩૧॥

તત્ર સર્વત્ર વિજયો ભક્ત્યેવ ન સંશયઃ ।
તત્ર લોકો વશેત્સર્વઃ સવાસો ભૈરવસ્યતુ ॥ ૩૨॥

ઉપમન્યો બહુક્તે કિં ન વાચ્યં યસ્યકસ્યચિત્ ।
ગુરુસન્તોષ્ય યત્નેન પઠિતવ્યં સમાહિતઃ ॥ ૩૩॥

ઐં હ્રીં ક્લીં મહાકાલસ્ય હ્રીં હ્રીં ફટ્ ફટ્ ફટ્ હૂઁ નમઃ સ્વાહા ॥ ૩૪॥

અથ શ્રીમહાકાલભૈરવસહસ્રનામસ્તોત્રમ્ ।
ૐ મહાકાલો મહાદેવો મહાકાયો મહાતપઃ ।
મત્તો મહેશ્વરો મૌની મહાદેવો મહાપ્રિયઃ ॥ ૧॥

મહાયોગી મહાકર્મા મહાભૂતો મૃદોયમઃ ।
માયા મનોમયો માન્યો મહાનીતિર્મહાગતિઃ ॥ ૨॥ (માયી મનોમયી)

મરુન્મહર્ષિમધ્યસ્થો મહાવ્યાધો મહાદ્યુતિઃ ॥ ૩॥ (મરુન્મહર્ષિયદ્યસ્થો)

મહામતિર્મહાભૂતિર્મહાનીતિમહાશ્રયઃ ॥ ૪॥ (મહામતિર્મહાભૂતિર્મહાનીતિર્મહાશ્રયઃ)

મહાન્મહાત્મા મૂર્દ્ધન્યો મુનીન્દ્રો મઘવાપતિઃ ।
માર્ગહ્યો માર્ગગો માર્ગી મૃગવ્યાધો મૃગપ્રિયઃ ॥ ૫॥

મૃતાધારો મહામૂર્તિ મહામાયો મહોત્કટઃ ।
મહારુદ્રો મહાગર્તો મહાનીતિર્મહામતિઃ ॥ ૬॥

મદો મોદો મહામોદો મહાસત્ત્વો મહામતઃ । (મહામનઃ , મહામનાઃ)
મહૌષધોર્મહાસિદ્ધિર્મરીચિર્મહિમા મયઃ ॥ ૭॥ (મહૌષધોર્મહાસિદ્ધિર્મરીચિર્મહિમાલયઃ)

મઙ્ગલો મઙ્ગલ્યો માયી મુણ્ડમાલી મનોજવઃ । (મઙ્ગલ્યો મઙ્ગલો માયી)
મહાપટ્ટર્મહાત્યાગી મહાકાશા મહાબલઃ ॥ ૮॥ (મહાકોશો)

મહાસનો મહાકલ્યો મહાગર્ભો મહાધનુઃ । (મહાકાલો)

મહેષ્વાશો મહોભર્તા મહાવીરો મહાભુજઃ ॥ ૯॥

મેખલો મધુરો મુણ્ડો મખકર્તા મખાયહા । (મેખલી)
માતામહો માતરિશ્વા મધુરો મધુર પ્રિયઃ ॥ ૧૦॥ (મધુરઃ)

મહોત્સવો મહાનેતા મન્યુમત્તો મહોવ્યમઃ । (મહોવ્યયઃ)
મહોત્સાહો મહાવર્તો મલ્યો મલનાશનઃ ॥ ૧૧॥ (મલયો)

માતૃપ્રિયો માતૃવર્તા માતુરો મારૂતા પતિઃ । (માતૃવર્તી)
મરુત્સખો મારિરિપુર્મારઙ્ગોમારભઞ્જનઃ ॥ ૧૨॥ (ભારભઞ્જનઃ)

મધુહા મધુમૃન્મધ્યો મેધ્યાસી મખકૃન્ચતઃ । (મધુમૃન્મેધ્યો)
યમો યામો યમપતિર્યજ્ઞો યજ્ઞવિવર્ધનઃ ॥ ૧૩॥

યોગી યજ્ઞેશ્વરો યજ્વા યક્ષેશો યોગિનીપતિઃ ।
યાયાવરો  યદુર્યુક્તિકૃત્યુક્તિસાધનઃ ॥ ૧૪॥

યતિ યતિ પ્રિયો યુગ્મો યુગપદ્યામિની પ્રિયઃ ।
યજ્ઞભુગ્યજ્ઞકૃદ્યજ્ઞો યદુનાથો યશઃ પ્રદઃ ॥ ૧૫॥

યોગાઙ્ગો યોગ સારઙ્ગો યોગ્યો યક્ષપતિઃ પતિઃ ।
યોગાચાર્યો યોગગમ્યો યુગ્મો યુગ્મચરો યશઃ ॥ ૧૬॥

રૂદો રત્નેશ્વરો રૌદ્રો રોગ રોગેશ્વરો રુચિઃ ।
રમ્યો રણપ્રિયો રુષ્ટો રોષહા રોષવર્ધનઃ ॥ ૧૭॥

રણશ્રેષ્ઠો રથો રામો રાટુરાત્રિચરો રુચિઃ ।
રોગહા રોગકૃદ્રોગી રમ્યો રસ્યો રસપ્રિયઃ ॥ ૧૮॥

રયો રાજેશ્વરો રાજા રાજ રાજો રમેશ્વરઃ ।
રશ્મિમાલી રુચિધરો રોચનો રસદો રસી ॥ ૧૯॥

રસપ્રિયો રસાવાસો રાજીવનયનો રઘુઃ ।
રક્ષઘ્નો રાક્ષસાહારો રુધિરૌઘ પ્રિયોરથઃ ॥ ૨૦॥

રચિરો રુચિરાવાસો રુચિકૃદ્રુચિરાઙ્ગદો ।
લમ્બો લઘુલોહિતાક્ષો લીલાબ્ધિ લલિતાસખઃ ॥ ૨૧॥

લલાટાક્ષો લોકકન્દો લક્ષ્મીર્લક્ષ્મીપતિર્લતાઃ ।
લીલાવિલાસો લોલાઙ્ગો લોલાક્ષો લોકવર્દ્ધનઃ ॥ ૨૨॥ (લીલાવિલાસી લોલાઙ્ગે)

લોકબન્ધુ લોકનાથો લક્ષ્મણો લક્ષ્મણપ્રિયઃ ।
લોકમાયા લોલજિહ્નો લલિતો લોલલક્ષણઃ ॥ ૨૩ ॥

લાવણ્ય લલિતો લાસ્યપ્રિયો લીલાવિભૂષણઃ ।
લુબ્ધો લમ્બોદરો લોક્યો લોકસ્વામી લસન્યતિઃ ॥ ૨૪ ॥

વૈદ્યો વરીયાન્વરદો વિદ્વાન્વિદ્યાવિશારદઃ ।
વિશ્વામરેશ્વરો વિશ્વવેદ્યો વેદવપુર્વિભુઃ ॥ ૨૫ ॥ (વિશ્વવન્દ્યો)

વિશ્વનાથો વિશ્વમૂર્તિર્વિશ્વકૃદ્વિશ્વવર્ધનઃ ।
વિશ્વાધારો વિશ્વગમ્યો વિશ્વભુગ્વિશ્વસાધનઃ ॥ ૨૬ ॥

વિરૂપાક્ષો વિશ્વરૂપો વાગીશો વૃષભધ્વજઃ ।
વેદાન્તવેદ્યો વિદ્યેશો વેદાઙ્ગો વેદવિદ્વિભુઃ ॥ ૨૭ ॥

વિબુધો વિજયો વર્ણી વર્ણાશ્રમ ગુરુર્વસુઃ ।
વિશ્વકર્મા વ સુમના વ્યાલભૃદ્વિદ્રુમચ્છવિઃ ॥ ૨૮ ॥

વિશિષ્ટો વિજયોવાદી વિશ્વકર્મા વૃષાકપિઃ ।
વેદ્યવૈદ્યો વેદવપુઃ વામદેવો વિમોચકઃ ॥ ૨૯ ॥

વિશ્વાખ્યો વિશ્વશ્રગ્વ્યાસો વિજિતાત્મા વ્યપોવસી ।
વીરભદ્રો વીરસેનો વીરાસન વિધિવિધઃ ॥ ૩૦ ॥

વ્યવસાયો વ્યવસ્થાનો વીરચૂણાણિવિરાટ્ । (વીરચૂડામ વિરાટ્)
વિશ્વદેહો બલીબલ્યો વિરામો વસુદોવરઃ ॥ ૩૧ ॥ (વલીબલ્યો?)

વિદ્વત્તમો વરુરુચિર્વૈદ્ધો વાચસ્પતિર્વપુઃ ।
વિરોચનો વીતભયો વિશુદ્ધો વિમલોદયઃ ॥ ૩૨ ॥

વૈવસ્વતો વિશ્વગોપ્તા વિભૂતિર્વિગતજ્વરઃ । (વૈવશ્વતો)
વશિષ્ઠો વિશ્વહા વિશ્વો વિશ્વકર્તા વસોઃપતિ ॥ ૩૩ । (વસોપતિઃ)
વિશ્વામિત્રો વિશ્વસાહો વીરોત્પત્તિર્વિદારણઃ । (વીરોત્પૂર્તિર્વિદારણઃ)
વિશ્વાવાસો વજ્રહસ્તો વજ્રરૂપી વસુશ્રવાઃ ॥ ૩૪ ॥ (વજ્રરૂપો)

વિરૂપો વિકૃતો વેગી વિપાકો વિશ્વકારકઃ ।
વીરોત્પત્તિર્વરસખો વ્યક્તા વ્યક્તો વિશામ્પતિઃ ॥ ૩૫ ॥

વિરૂપો વિકૃતો વાગ્મી વિરઞ્ચિવિષ્ટરશ્રવાઃ । (વિરઞ્ચિર્વિષ્ટરશ્રવાઃ)
વિચક્ષણો વિશ્વગર્ભો વિદુધાગ્રકરો વિરાટ્ ॥ ૩૬ ॥

વિચક્ષણો વિલોમાક્ષો વિરૂપાક્ષો વૃકોદરઃ ।
વસન્તો વિત્તદો વિત્તવૃષદો વિક્રમોત્તમઃ ॥ ૩૭॥

વૃષદો વિક્રમો વેદ્યો વૈદ્યો વિશ્વવિભૂષણઃ । (વેદ્યો વેદ્યો)
વિષમસ્થો વિવિક્તસ્થો વિવિક્તો વિશ્વભાવનઃ ॥ ૩૮॥ (વિવિક્તેસ્થો)

વિદ્યારાશિવશિષ્ઠજ્ઞો વિશ્વનાથો વિપાત્કિયઃ । (વિપાત્ક્રિયઃ)
શ્રૃઙ્ગીસર્વશિવઃ શમ્ભુઃ શ્રીકણ્ઠઃ શ્રીનિધિઃ શમઃ ॥ ૩૯॥

શમનઃ શોભનઃ શૂલી શૂલશાન્તઃ શિવશઙ્કરઃ । (શોમનઃ)
શઙ્કરઃ શોભનઃ શુદ્ધઃ શુદ્ધાખ્યઃ શુદ્ધવિગ્રહઃ ॥ ૪૦॥

શાખઃ શઙ્ખઃ શનિઃ શ્રીદઃ શ્રીગર્ભઃ શરણપ્રિયઃ ।
શ્રન્યઃ શરણ્યઃ શાન્તાત્મા શ્રુતિગીઃ શ્રુતિવત્સલઃ ॥ ૪૧॥ (શ્રવ્યઃ)

શ્રુતિપ્રિયઃ શ્રુતિગતિઃ શ્રુતિજ્ઞઃ શ્રુતિમાન્શ્રુતઃ ।
ષઙ્ગ ષઙ્ગણઃ ષષ્ઠઃ ષડઙ્ગઃ ષણમુખવલ્લભઃ ॥ ૪૨॥
(ષડઙ્ગઃ ષઙ્ગણઃ ષષ્ઠઃ ષઙ્ગ ષણમુખવલ્લભઃ)

સહસ્રાર્ચિઃ સપ્તજિહ્વઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સામવેદઃ સોમરત્તઃ સામવૃતઃ સનાતનઃ ॥ ૪૩॥ (સોમરતઃ સામવૃત્તઃ)

સદાશિવઃ સનાત્સર્વઃ સમ્ભાષ્યઃ સ્વાશ્રમઃ સહઃ ।
સુવર્ણઃ સર્વલોકેશઃ સૂર્ય સર્વેશ્વરઃ સુહૃત્ ॥ ૪૪॥ (સહૃત્)

સ્વસ્તિભુક્ સુગ્રહઃ સ્વસ્તિઃ સ્વસ્તિકઃ સ્વતિભૂઃ સુધાઃ ।
સમ્ભાવ્યઃ સમ્ભવઃ સત્ત્વઃ સત્યજ્ઞઃ સત્યસઙ્ગરઃ ॥ ૪૫॥

સર્વાવાસઃ સુરાધીશઃ સન્તોષઃ સમ્પ્રતઃ સહઃ ।
સર્વાદિસિદ્ધિદઃ સિદ્ધઃ સુવીરઃ સર્વલોકધૃક્ ॥ ૪૬॥

સંસારચક્રકૃત્સારઃ સંસારઃ સર્વસાધનઃ ।
સુશરણ્યઃ સુરગણઃ સુબ્રહ્મણ્યઃ સુધાનિધિઃ ॥ ૪૭॥

સંરાટ્સુખેન સર્વાંશો સ્વાધિષ્ઠાનં સતાઙ્ગતિઃ । (સર્વાંશી)
સંવત્સરઃ સર્વહારી સઙ્ગ્રામઃ સાગરપ્રિયઃ ॥ ૪૮॥

સમર્થઃ સર્વદિક્સ્વસ્થઃ સર્વાવાસઃ સુરારિહા ।
સુવૃદ્ધાત્મા સુપ્રતીકઃ સમૃષ્ટઃ સપ્તતિઃ સમઃ ॥ ૪૯॥

સદ્યોગી સુગતઃ સ્રગ્વી સારથિઃ સદસન્મયઃ ।

સર્વદેવમયઃ સોમઃ સર્વશાસ્ત્રપ્રભઞ્જનઃ ॥ ૫૦॥

સુખાનિલઃ સુપ્રપન્નઃ સહસ્રસુખનાશિકઃ ।
સર્વદેવોત્તમઃ સેતેઃ સર્વભૂત મહેશ્વરઃ ॥ ૫૧॥ (સેતુઃ)

સકુમારઃ સુરાધ્યક્ષઃ સુરાભીષ્ટઃ સુલોચનઃ ।
સામગાનપ્રિયઃ સામઃ સામગઃ સત્યસઙ્ગરઃ ॥ ૫૨॥

સર્વાવાસઃ સુતસ્રષ્ટા સત્યવ્રત પરાયણઃ ।
સ્વર્ગતઃ સકલઃ સ્વર્ગી સર્વસ્વનમયઃ સ્વનઃ ॥ ૫૩॥

સર્વાધારઃ સુરાહારઃ સુરાતૃપ્તઃ સુરામયઃ ।
સુરાધારઃ સુરાપૂજ્યઃ સુરહેતુઃ સુરાકરઃ ॥ ૫૪॥ (સુરાઙ્કુરઃ)

સદાનન્દઃ સુપ્રકાશઃ સરસઃ સારસપ્રિયઃ ।
સ્તોત્રં સ્તવપ્રિય સ્તોતા સુનિષ્ઠઃ સુરતપ્રિયઃ ॥ ૫૫॥

સુરતાસન સન્તુષ્ટઃ સુરતાધાર તત્પરઃ ।
સુરતપ્રવણઃ સૂર્યઃ સૂર્યમણ્ડલમધ્યગઃ ॥ ૫૬॥

સાધુઃ સાધુપ્રિયઃ સાધ્વીપતિઃ સાધનસાધિતઃ ।
સમ્ભૂતિઃ સાગરગતિઃ સાઙ્ગઃ સન્તાનદઃ સખા ॥ ૫૭॥

સાયકઃ સઙ્ગીતકરઃ સમરઃ સમરપ્રિયઃ ।
સપ્તજિહ્વઃ સહસ્રાર્ચી સપ્તાર્ચિઃ સપ્તવાહનઃ ॥ ૫૮॥

સાત્વિકઃ સર્વજિત્સત્યઃ સર્વસંસાર સારધિઃ । (સારથિઃ)
સપ્તાચલમુનીશાનઃ સૃષ્ટિ સ્રષ્ટા સ્તવપ્રિયઃ ॥ ૫૯॥

સ્થૂલ સૂક્ષ્મઃ સદાદૃષ્ટિ સહસ્રાર્કપ્રકાશકઃ ।
સહસ્રદંષ્ટ્રઃ સન્ધાતા સારમેયાનુગઃ સ્વભૂઃ ॥ ૬૦॥

સંવૃત્તઃ સંવૃત્તઃ સૌરિઃ સદાતુષ્ટઃ સદોદ્ધતઃ । (સંવૃત્તઃ સંવૃતઃ)
હર્ષણો હ્રેષણો હર્ષી હરો હંસો હરિપ્રિયઃ ॥ ૬૧॥

હયમાંસપ્રિયો હૃષ્ટો હૃષીકેશો હયાકૃતિઃ ।
હેતુપ્રિયો હેતુગમ્યો હેતુર્હેમપ્રિયોહવિઃ ॥ ૬૨॥

હલાહલધરો હારી હનૂમાન્ હાટકેશ્વરઃ । (હાલાહલધરો) (હારકેશ્વરઃ)
હઠી હઠપ્રિયો હુણ્ડો હુણ્ડમાંસાશનપ્રિયઃ ॥ ૬૩॥

હાલાપાનરતો હન્તા હસ્તિમાંસાસનો હુતઃ ।
હ્રેષો હ્રેષણકૃધ્દસ્તી હન્તા હસ્તિપકો હલી ॥ ૬૪॥ (હ્રેષી) (હરિસ્તપકો)

હ્રીં પતિઃ હ્રીં નિધિઃ હ્રીં શો હ્રીં સખો હ્રીં નિષેવિતઃ । (હ્રીં ઈશો)
(હ્રી પતિઃ હ્રી નિધિઃ હ્રી શોઃ હ્રી સર્વો હ્રી નિષેવિતઃ)
હૌઙ્કાર ક્ષત્રયઃ ક્ષત્રી ક્ષેત્રજ્ઞઃ ક્ષેત્રદઃ ક્ષમી ॥ ૬૫॥ (ક્ષત્રપઃ ક્ષત્રીઃ)

ક્ષોણાધારઃ ક્ષેમનાથઃ ક્ષયઃ ક્ષોણોધરાશ્રયઃ । (ક્ષોણીધરાશ્રયઃ)
ક્ષપાનાથધરઃ ક્ષત્તાઃ ક્ષણદેશઃ ક્ષપાકરઃ ॥ ૬૬॥

ક્ષત્રિયઃ ક્ષત્રિયાધીશઃ ક્ષમાઃ ક્ષૈમઃ ક્ષયઙ્કરઃ । (ક્ષામઃ)
ક્ષત્રિયઃ ક્ષજતોહારઃ ક્ષયકૃત્ક્ષયવલ્લભઃ ॥ ૬૭॥ (ક્ષયત્કુલ ક્ષયવલ્લભઃ)

અનન્તોઽનન્તગમનોઽનન્તાક્ષોઽનન્તશાસનઃ ।
અનાદિરતુલોચિન્ત્યો અવ્યયોવ્યયવર્જિતઃ ॥ ૬૮॥

અવધૂતોવટસ્થાની અનન્ત્યોદ્ભુત્વિક્રમઃ ।
આનન્દ આત્મવાનાદ્ય આદિત્યાદ્યેશ્વરેશ્વરઃ ॥ ૬૯॥

અનેકરૂપોઽનન્તશ્રીરાદિદેવોરમેશ્વરઃ ।
અર્ચપ્રિયોઽક્ષયોઽક્ષીણઃ આસાવાધાર આદિમઃ ॥ ૭૦॥

ઈશ્વરોવસુરીસાનઃ ઇન્દુરિન્દ્રઃ ઇલાપતિઃ ।
ઉગ્ર ઉગ્રા ઉગ્ર ઉચ્ચ ઉચ્ચ ઉચ્ચશ્રવા ઉદક્ ॥ ૭૧॥

ઊર્ધ્વપાદુત્તમગતિઃ ઊર્ધ્વગોર્ધ્વગતિર્મતિઃ । (ઊર્ધ્વગોર્ધ્વગતિર્ગતિઃ)
ઉદ્યાનવાસીસુરસઃ કરોરુર્દ્ધજનપ્રિયઃ ॥ ૭૨॥

કુલપ્રિયઃ કુલધરઃ કુલાધારઃ કુલેશ્વરઃ ।
કુલાચારકરઃ કાર્ય કુલાચાર પ્રવર્તકઃ ॥ ૭૩॥

કૌલવતધરઃ કૂર્મઃ કામી કેલિપ્રિયઃ ક્રતુઃ ।
કલાધરઃ કણ્ઠકાલઃ કૂટસ્થઃ કોટરાશ્રયઃ ॥ ૭૪॥

કરુણઃ કરુણાવાસઃ કરુણામૃતવારિધિઃ ।
કૃતીકૃતજ્ઞઃ કૃત્યાવાન્કૌતુકી કાલિકાપતિઃ ॥ ૭૫॥

કરિચર્મધરઃ કર્મી કારુણં કરુણાકરઃ ।
કૃષ્ણઃ કૃષ્ણપ્રિયઃ કૃષ્ણારાધ્યઃ કૃષ્ણકુલાન્તકઃ ॥ ૭૬॥

કૂટસ્થઃ કૂટકાવાસઃ કર્મઠઃ કર્મઠપ્રિયઃ ।

કઠિનઃ કોમલઃ કર્ણકણ્ઠવાસાઃ કુલેશ્વરઃ ॥ ૭૭॥ (કલેશ્વરઃ)

કરાલમાલીકાલજ્ઞઃ કૃતકૌતુકમઙ્ગલઃ ।
કન્યાકુલપતિઃ કન્યાનાથઃ કન્યાકુલાશ્રયઃ ॥ ૭૮॥

ખડ્ગી ખડ્ગધર ખઞ્જ ખમતિઃ ખગતિઃ ખગઃ ।
ખલન્વઃ ખલયઃ ખ્યાતઃ ખ્યાતિમાન્ ખેચરીપ્રિયઃ ॥ ૭૯॥

ગગૌ ગૌરીપતિર્ગીતા ગોત્રેશો ગૌતમપ્રિયઃ । (ગણૌ)
ગણૌ ગણેશ્વરો ગણ્યો ગુણીજ્ઞાનપ્રિયોગતિઃ ॥ ૮૦॥

ગાનગમ્યો ગદૌ ગૌરી ગિરીશો ગૌરેવેશ્વરઃ । (ગદી ગૌરૌ)
ગાલવોગર્તસદનો ગન્ધર્વો ગન્ધવલ્લભઃ ॥ ૮૧॥

ગન્ધર્વાધિપતિર્ગેયોગીષ્પતિર્ગરુડધ્વજઃ ।
ગોપતિગોસવો ગોપ્તા ગાયત્રીગણતત્પરઃ ॥ ૮૨॥

ગોપ્રચારો ગણધરો ગણેશો ગણવલ્લભઃ ।
ગદ્યપ્રિયો ગદ્યગમ્યો ગુરુગમ્યો ગુરોદરઃ ॥ ૮૩॥

ગૂઢકર્મા ગૂઢધર્મા  ગુપ્તો ગુપ્તમતપ્પ્રિયઃ ।
ગઙ્ગાધરો ગવાઙ્ગોપ્તા ગોસવો ગોરસેશ્વરઃ ॥ ૮૪॥

ઘણ્ટાનાદપ્રિયોધર્મ ઘણ્ટાયાનિર્ઘટોદરઃ ।
ઘટાધારો ઘટાવાસો ઘનદાઘેનગર્જિતઃ ॥ ૮૫॥

અઙ્ગદોગન્ધરો ગોગી પિઙ્ગાક્ષઃ શ્રૃઙ્ખલાધરઃ । (પિઙ્ગલાક્ષઃ)
ચણ્ડિ ચણ્ડપ્રિયશ્ચિત્તશ્ચૌરશ્ચોરપતીશ્વરઃ ॥ ૮૬॥ (ચણ્ડપ્રિયશ્ચિતઃ ચ ઉરપતીશ્વરઃ)

ચારુવેગશ્ચારુગતિશ્ચાર્યગશ્ચારુભૂષણઃ । (ચારુવેગશ્ચારુગતિઃ ચાયઙ્ગશ્ચારુભૂષણઃ)
ચર્મવાસાશ્ચન્દ્રચૂડ ચિન્તાદ્યશ્ચિન્તિતપ્રદઃ ॥ ૮૭॥ (ચર્મવાસીશ્ચન્દ્રચૂડ)

ચિન્તામણિશ્ચિત્રગતિશ્ચિરાયુશ્ચણ્ડિકાસખઃ ।
ચિતાવાસાશ્છિન્નરૂપશ્છલજ્ઞશ્છલનિગ્રહઃ ॥ ૮૮॥ (ચિતાવાસાંશ્છિન્નરૂપઃ છલશ્ચલનિગ્રહઃ)

છાદનશ્છદનશ્છન્દશ્છન્દચારી છલપ્રિયઃ । (છાદનશ્છન્દનશ્છન્દઃ છન્દચારી)
છાગમાંસપ્રિયશ્છાગશ્છિન્નારિશ્છિન્નબન્ધનઃ ॥ ૮૯॥

છેદશ્છેદકરશ્છેદી છેદ્મેશશ્છદ્મવલ્લભઃ । (છેદશ્છેદકરશ્છેકો છેદ્મેશશ્ચછદ્યવલ્લભઃ)
છાદનશ્છદનશ્છન્દશ્છન્દોવૃત્તિવિશારદઃ ॥ ૯૦॥ (છાદનશ્છદ્મનશ્છદ્યઃ છન્દોવૃત્તિવિશારદઃ)

જયાજયન્તો જયકૃજ્જયદો જયવર્દ્ધનઃ ।
જયાસખો જયપ્રેપ્સુર્જિતકાશી જિતેન્દ્રિયઃ ॥ ૯૧॥ (જયપ્રેપ્સુઃ જિતકાશી)

જૃમ્ભારિ જૃમ્ભનો જૃમ્ભી જીવાતુર જીવનપ્રદઃ ।
જલધિર્જલધોજાનો જિતોજીનો જગત્પતિઃ ॥ ૯૨॥

જાતુકર્ણો જટાધારી જન્મમૃત્યુ જરાતિગાઃ।
જ્યાયાન્જિષ્ણુર્જિતોરાતિઃ જીવાજીવો જલોદરઃ ॥ ૯૩॥

જોષી જાયપ્રદો જોષો જોષજો જોષવર્ધનઃ ।
ગાત્કરો ગર્ગસે ગઙ્ગા ટઙ્કાષ્ટઙ્કુરોટનઃ ॥ ૯૪॥

ટીકા ટીકાકરષ્ઠાયી ઠસરૂપો ઠયાશ્રયઃ।
ડિનપ્રિયો ડાકિનીશો ડામરો ડમરૂપ્રિયઃ ॥ ૯૫॥

ઢુન્ઢિ ઢૈકનકૃતઢઙ્કુ ઢારોસુણ્ડોણ્ડજાશાનઃ ।
તરુણસ્તરુણીનાથઃ તીર્થસ્તીર્થાશ્રયોમયાન્ ॥ ૯૬॥

તીર્થજ્ઞઃ તીર્થકૃત્તીર્થા તીર્થદસ્તીર્થવલ્લભઃ ।
તીર્થતૃપ્તિઃ તીર્થહૃષ્ટ્યઃ તમોનાશસ્તમાશ્રયઃ ॥ ૯૭॥

તોયદસ્તપનસ્તાયીસ્તૃપ્તાલીરસનપ્રિયઃ ।
તારસ્તેજોનિધિઃ સ્તોત્ર સ્તોમરસ્તોમરારાયુધઃ ॥ ૯૮॥

તીર્થગણ્ડીદદોહસ્ત દુધરોદારુણાકૃતિઃ । (હસ્ત )
દુર્ગો દુર્ગપ્રિયો દીપ્તો દુર્ગહા દુર્ગ રક્ષકઃ ॥ ૯૯॥

દેવદેવો દેવપૂજ્યો દેવેન્દ્રો દૂરદર્શનઃ ।
દોષજ્ઞો દોષદો દીનપ્રિયો દણ્ડીશ્વરો દમઃ ॥ ૧૦૦॥

દયાલુર્દમ્ભદમનો દેવપૂજ્યો દમવ્રતઃ ।
ધર્મપ્રિયો ધનાધ્યક્ષો ધનદો ધાન્યભૃક્ધની ॥ ૧૦૧॥

ધીરો ધીરા ધરો ધારા ધરો ધેયો ધુરન્દરઃ । (ધરોર્ધેયો)
ધૃતિ ધૈર્યધ્વજી ધાતા નયો નેતા નમસ્કૃતઃ ॥ ૧૦૨॥

નારાયણસુખો ન્યાસો નીતિમાન્નીતિવર્ધનઃ ।
નૃસિંહદર્પદમનો નિર્દ્વન્દ્વો નિરુપદ્રવઃ ॥ ૧૦૩॥

નાગરૂપો નાગધરો નરો નરકજિન્નૃપઃ ।
નારીસખો નાદગમ્યો નાદોનાદવિવર્ધનઃ ॥ ૧૦૪॥

નાયકો નારદો નમ્રા નૈર્નેષ્ટા નાટ્યનાયકઃ ।
નદીશયો નદીનાથો નન્દનો નન્દિવલ્લભઃ ॥ ૧૦૫॥

નર્મદાવાસસન્તૃપ્મો નર્મજ્ઞો નૂતનો નવઃ । (નર્મદાવાસસન્તૃપ્ત)
પદુઃ પાતાલનિલયઃ પૂરનઃ પ્રેતવાહનઃ ॥ ૧૦૬॥ (પ્રતવાહનઃ )

પ્રેતાસનગતઃ પ્રેત પ્રેતભુક્પવનાશનઃ ।
પીણસર્પો  પીણગતિઃ પણ્ડિતઃ પલ્લવાયણઃ ॥ ૧૦૭॥

પુરાણઃ પુણ્યગમનઃ પુણ્યવાસ પરાયણઃ ।
પદાતો પરમપ્રીતઃ પ્રયોક્તા પ્રણવઃ પ્રભુઃ ॥ ૧૦૮॥
પ્રત્યયઃ પાનપઃ પાતા પુરુષઃ પુરુષેશ્વરઃ ।
પર્જન્યઃ પાર્વતીનાથઃ પશુનાથઃ પ્રજાપતિઃ ॥ ૧૦૯॥

ફેત્કારઃ ફેરવીનાથઃ ફૂત્કારઃ ફલદઃ ફલઃ । (ફત્કારઃ)
ફેનપઃ ફણિભૃદ્ધેતુ બર્ટુબાલો બલાશ્રયઃ ॥ ૧૧૦॥ (બટુબાલો)

બ્રહ્માણ્ડભેદનો બ્રહ્મા બ્રહ્મભુક્બ્રહ્મવર્ધનઃ ।
બ્રહ્મણ્યો બ્રહ્મણો બ્રહ્મો બ્રહ્મભુગ્બ્રહ્માસરરિઃ ॥ ૧૧૧॥ (બ્રહ્મભુગ્બ્રહ્મસહરપિઃ)

બન્ધઘ્નો બન્ધહા બીજં બહુકૃદ્દહુભગ્વલિઃ । (બહુકૃદ્યુગ્બહુબલિઃ)
વિપ્રપ્રિયો વિપ્રસખો વિપ્રેશો વિત્તયો વસુઃ ॥ ૧૧૨॥

ભગો ભર્ગો ભૃગુર્ભૃગી ભવ્યો ભીમો ભયઙ્કરઃ । (ભૃગુર્ભઙ્ગી)
ભઙ્ગાસ્વાદો ભૂતનાથો ભાલાક્ષો  ભૂતિભૂષણઃ ॥ ૧૧૩॥

ભદ્રેશ્વરો ભદ્રગતિર્ભાનુર્ભદ્રધ્વજો ભવઃ ।
ભગપ્રિયો ભગાવાસો ભગભૂર્ભગયોષણઃ ॥ ૧૧૪॥ (ભગવાસો)

ફલશ્રુતિઃ -
ઇતિ નામ્ના દશશતં મહાકાલસ્ય સદ્ધનમ્ ।
પુત્રારોગ્યધનં પ્રીતિપ્રદં વિજયવર્ધનમ્ ॥ ૧૧૫॥

સર્વદુષ્ટપ્રશમનં સર્વવ્યાધિવિનાશનમ્ ।
એકકાલં દ્વિકાલં વા ત્રિકાલં શ્રદ્ધયાન્વિતઃ ॥ ૧૧૬॥

યઃ પઠેન્નિયતઃ શુદ્ધઃ સર્વાન્કામાનવાપ્નુયાત્ ।
પૂજાન્તે ચાપિહોમાન્તે જયાન્તે ચ પઠેદિદમ્ ॥ ૧૧૭॥

પુરશ્ચરણમેતસ્ય શતાવૃતિરિહોચ્યતે ।
મહાકાલ સમોભૂત્વા યોજયેન્નિશિ નિર્ભયઃ ॥ ૧૧૮॥

યશઃ કામાનવાપ્નોતિ માનસાન્નાત્ર સંશયઃ ।
નિશાયાં ભૂમિકામશ્વષણમાંસાન્યો જપેત્સુધીઃ ॥ ૧૧૯॥

પ્રતિકૃત્યા વિનાશાય જપેદેતત્ક્ષણ ત્રયમ્ ।
માસત્રયં જપત્રિત્ય નિશિ નિશ્ચલધીઃ સ્વયમ્ ॥ ૧૨૦॥

પુત્રાન્ધન તથા દારાન્પ્રાપ્નોત્યત્ર ન સંશયઃ ।
કારાગૃહહેતુ નિગડૈર્બદ્ધઃ કર્પાટભિદ્દૃઢઃ ॥ ૧૨૧॥

પઠેન્નિદં દિવંરાત્રં સર્વાન્કામાનવાપ્નુયાત્ ।
યં યં કામયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૧૨૨॥

॥ ઇતિ શ્રી શૈવાગમકલ્પે મહાકાલસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

The stated source text "shaivAgamakalpa" could not be traced as on the date of updating of this webpage.

The variations given are collated from the available source-print and the audio-video. Readers are advised to use due discretion.

Proofread by Ruma Dewan

*Shri Mahakalabhairava Sahasranama Stotram*

pdf was typeset on March 3, 2023

Please send corrections to *sanskrit@cheerful.com*